# E – 3402

# B. A. (Classics) (Part – III) Examination -2021

(Compulsory)

Paper First

**(साहित्यम्)**

Time : Three Hours ] [ Maximum Marks : 75

**सूचना** :– सर्वे प्रश्नाः समाधेयाः ।

**1.** निम्नांकितेषु कचन द्वे पद्ये प्रसंग सहिते व्याख्येये – 16

i. एतस्मिन्मदकल मल्लिकाक्षपक्ष व्याधूतस्फुरदुरू दण्डरीकाः ।
वाष्पाम्भः परिपतनोद्गमान्तराले सन्दृष्टाः कुवलयिनो मया विभागः ।।

ii. प्रियप्राया वृत्तिर्विनयमधुरो वाचि नियमः,
प्रकृत्या कल्याणी मतिरनवगीतः परिचयः ।
पुरोवा पश्चाद्वा तदिदमविपर्यासितरसं,
रहस्य साधूनामनुपधि विशुद्धं विजयते ।।

iii. यया पूतम्भन्यो निधिरपि पवित्रस्य महसः,
पतिस्ते पूर्वेषामपि खलुं गुरूणां गुरूतमः ।
त्रिलोकीमंगल्यामवनितललीनेन शिरसा –
जगद्वन्द्यां देवीमुषसमिव वन्दे भगवतीम् ।।

iv. न किञ्चितदपि कुर्वाणः सौख्यैर्दुःखान्यपोहति ।
तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः ।।

**2.** "उत्तरे रामचरिते भवभूतिर्विशिष्यते।" इत्युक्तिः समीक्षणीया । 14

**अथवा**

उत्तरराम चरितस्य रामस्य चरित्रचित्रणं क्रियताम् ।

**3.** अधोलिखितेषु किमपि पद्यद्वयम् व्याख्येयम् – 16

i. प्रत्यासन्ने नभसि दयिताजीविता लम्बनार्थी,
जीमूतेन स्वकुशलमयीं हारयिष्यन्प्रवृत्तिम् ।
स सत्प्रग्रैः कुजटकुसुमैः कल्पितार्घाय तस्मै,
प्रीतः प्रीतिप्रमुखवचनं स्वागतं व्याजहार ।।

ii. गत्वा चोर्ध्वं दशमुखभुजोच्छ्वासितप्रस्थसन्धेः,
कैलासस्य त्रिदशवनिता दर्पणस्यातिथिः स्याः ।
श्रृंगोच्छ्छायैः कुमुदविशदैर्यो वितत्य स्थितिः खं,
राशीभूतः प्रतिदिनमिव त्र्यम्बकस्याट्टहासः ।।

iii. हस्ते लीलाकमलमलके बालकुन्दानुविद्धं,
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः ।
चूडापाशे नवकुरबकं चारू कर्णे शिरीषं,
सीमन्ते च त्वदुपगमजं यत्र नीपं वधनाम् ।।

iv. एतकृत्वा प्रियमनुचितप्रार्थनावर्तिनो मे,
सौहार्दाद्वा विधुर इति वा मय्यरनुक्रोश बुद्ध्या ।
इष्टान्देशान् विचर जलद प्रावृषा समभृतश्री –
र्मा भूदेवं क्षणमपि च ते विद्युता विद्रयोगः ।।

**4.** मेघदूतमाश्रित्य मेघमार्गस्य वर्णनं क्रियताम् । 14

**अथवा**

'उपमा कालिदासस्य ––––––" इत्युक्तिः समीक्षणीया।

**5.** व्याख्या विधेया – 5

क. द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।
तयोरन्यः पिप्पलं स्वाद्वति अनश्नन्नन्यो अभिचाकशीति ।।

**अथवा**

या दुग्धाऽपि न दुग्धेव कविदोग्धृभिरन्वहम् ।
हृदि नः सन्निधत्तां सा सूक्तिधेनुः सरस्वती ।।

ख. काव्यमीमांसायां काव्यपुरूषस्या स्वरूपं वर्ण्यताम् । 10

**अथवा**

व्याख्या कार्या –

इह हि वाङ्मयमुभयेथा शास्त्रं काव्यं च । शास्त्रपूर्वकत्वात् काव्यानां पूर्वं शास्त्रेष्वभिनिविशेत । नह्यप्रवत्तितप्रदीपास्तमसि तत्वार्थसाथमध्यक्षयन्ति । तच्च द्विधा अपौरूषेयं पौरूषेयं च । अपौरूषेयं श्रूतिः । सा च मन्त्रब्राह्मणे । विवृतक्रिया मन्त्राः । मन्त्राणां स्तुतिनिन्दा व्याख्यान विनियोगादिग्रन्थों ब्राह्मणम् । ऋग्यजुः साम वेदास्त्रयी । अथर्व तुरीयम् । तत्रार्थव्यवस्थितपादा ऋचः ।

***